शिशोरक्षानिमित्ततः । शिशोश्च स्नपनं कुर्य्यात् सर्व्वगन्धादिकैः शुभैः । कराला पिङ्गला मुण्डा कषायाम्बरवासिनी । देवी बालमिमं प्रीता संरक्षत्वन्धपूतना” ६ ।

“अथातः शीतपूतनाप्रतिषेधं व्याख्यास्यामः। कपित्थं सुवहां विम्बीन्तथा विल्वं प्रचीवलम् । नन्दीं भल्लातकीञ्चापि परिषेके प्रयोजयेत् । वस्तमूत्रं गवां मूत्रं मुस्तञ्च सुरदारु च । कुष्ठञ्च सर्व्वगन्धञ्च तैलार्थमवचारयेत् । रोहिणीसर्ज्जखदिरपलाशककुभत्वचः । निःक्काथ्य तस्मिन्निःक्काथे सक्षीरं विपचेत्ततः । गृध्रोलूकपूरीषाणि वस्तगन्धामहेस्त्वचः । निम्बपत्राणि मधुकं धूपनार्थं प्रयोजयेत् । धारयेदपि लम्बाञ्च गुञ्जां काकादनीं तथा । नद्यां मुद्गकृतैश्चान्नैस्तर्पयेच्छीतपूतनाम् । देव्यै देयश्चोपहारो वारुणीरुधिरं तथा । जलाशयान्ते बालस्य स्नपनं चोपदिश्यते । मुद्गौदनाशना देवी सुराशोणितपायिनी । जलाशयालया देवी पातु त्वां शीतपूतना” ७ ।

“अथातोमुखमण्डिकाप्रतिषेधं व्याख्यास्यामः । कपित्थविल्वतर्क्कारीमांसीगन्धर्व्वहस्तकाः । कुवेराक्षी च योज्याः स्युर्बीजानां परिषेचने । सरसैर्भृङ्गवृक्षाणां तथाजर्हरिगन्धयोः । तैलं वसाञ्च संयोज्य पचेदभ्यञ्जने शिशोः । मधूलिकायां पयसि तुगाक्षीर्य्याङ्गणे तथा । मधुरे पञ्चमूले च कनीयसि घृतं पचेत् । वचासर्ज्जरसः कुष्ठं सर्पिश्चोद्धूपने हितम् । धारयेदपि जिह्वाश्च चाषचीरल्लिसर्प्पजाः । वर्णकं चूर्णकं माल्यमञ्जनं पारदं तथा । मनःशिलाञ्चोपहरेद्गोष्ठमध्ये बलिं तथा । पायसं सपुरोडाशं बल्यर्थमुपहारयेत् । मन्त्रपूताभिरद्भिश्च तत्रैव स्नपनं हितम् । अलङ्कृता रूपवती सुभगा कामरूपिणी । गोष्ठमध्यालयरता पातु त्वां मुखमण्डिका” ८ ।

“अथातो नैगमेयप्रतिषेधं व्याख्यास्यामः । विल्वाग्निमन्थपूतीकाः कार्य्याः स्युः परिषेचने । सुरासौवीरधान्याम्लैः परिषेकश्च शस्यते । प्रियङ्गुसरलानन्ताशतपुष्पाकुटन्नटैः । पचेत्तैलं सगोमूत्रैर्दधिमस्त्वम्लकाञ्जिकैः । पञ्चमूलद्वयक्काथे क्षीरे मधुरकेषु च । पचेद्घृतञ्च मेधावी खर्ज्जूरीमस्तकेऽपि च । वचां वयस्थां गोलोमीं जटिलां चापि धारयेत् । उत्सादनं हितं चात्र स्कन्दापस्मारनाशनम् । सिद्धार्थकवचाहिङ्गुकुष्ठञ्चैवाक्षतैः सह । भल्लातकाजमोदाश्च हितमुद्धूपनं शिशोः । मर्क्कटोलूकगृध्राणां पूरीषाणि नवग्रहे । धूपः सुप्ते जने कार्य्यो बालस्य हितमिच्छता । तिलतण्डुलकं माल्यं भक्ष्यांश्च विविधानपि । कुमारपितृमेधाय वृक्षमूले निवेदयेत् । अधस्ताद्वटवृक्षस्य स्नपनं चोपदिश्यते । बलिं न्यग्रोधवृक्षेषु तिथौ षष्ठ्यां निवेदयेत् । अजाननश्चलाक्षिभ्रूः कामरूपी महायशाः । बालं पालयिता देवो नैगमेयोऽभिरक्षतु” ९ ।

“अथातोग्रहोत्पत्तिमध्यायं व्याख्यास्यामः । नव स्कन्दादयः प्रोक्ता बालानां य इमे ग्रहाः । श्रीमन्तो दिव्यवपुषो नारीपुरुषविग्रहाः । एते गुहस्य रक्षार्थं कृत्तिकोमाग्निशूलिभिः । सृष्टाः शरवणस्थस्य रक्षितस्यात्मतेजसा । स्त्रीविग्रहा ग्रहा ये तु नानारूपा मयेरिताः । गङ्गोमाकृत्तिकानाञ्च ते भागा राजसा मताः । नैगमेयस्तु पार्व्वत्या सृष्टो मेषाननो ग्रहः । कुमारधारी देवस्य गुहस्यात्मसमः सखा । स्कन्दापस्मारसंज्ञो यः सोऽग्निनाग्निसमद्युतिः । स च स्कन्दसखो नाम विशाख इति चोच्यते । स्कन्दःसृष्टो भगवता देवेन त्रिपुरारिणा । बिभर्त्ति चापरां संज्ञां कुमार इति स ग्रहः। बाललीलाधरो योऽयं देवो रुद्राग्निसम्भवः । मिथ्याचारेषु भगवान् स्वयं नैष प्रवर्त्तते । कुमारः स्कन्दसामान्यादत्र केचिदपण्डिताः । गृह्णातीत्यल्पविज्ञाना ब्रुवते देहचिन्तकाः । ततो भगवति स्कन्दे सुरसेनापतौ कृते । उपतस्थुर्ग्रहाः सर्व्वे दीप्तशक्तिधरं गुहम् । ऊचुः प्राञ्जलयश्चैनं वृत्तिं नः संविधत्स्व वै। तेषामर्थे ततः स्कन्दः शिवं देवमचोदयत्। ततो ग्रहांस्तानुवाच भगवान् भगनेत्रहृत् । तिर्य्यग्योनिं मानुषञ्च दैवञ्च त्रितयं जगत् । परस्परोपकारेण वर्त्तते धार्य्यतेऽपि च । देवा मनुष्यान् प्रीणन्ति तैर्य्यग्योनींस्तथैव च । वर्त्तमानैर्य्यथाकालं शीतवर्षोष्णमारुतैः । इज्याञ्जलिनमस्कारजपहोमव्रतादिभिः । नराः सम्यक् प्रयुक्तैश्च प्रीणन्ति त्रिदिवेश्वरान् । भागधेयं विभक्तञ्च शेषं किञ्चिन्न विद्यते । तद्युष्माकं शुभा वृत्तिर्बालेष्वेव भविष्यति । कुलेषु येषु नेज्यन्ते देवाः पितर एव च । ब्राह्मणाः साधवश्चैव गुरवोऽतिथयस्तथा । निवृत्ताचारशौचेषु परपाकोपभोजिषु । उत्सन्नबलिभिक्षेषु भिन्नकांस्योपभोजिषु । गृहेषु तेषु ये बालास्तान् गृह्णीध्वमशङ्किताः । तत्र वो विपुला वृत्तिः पूजा चैव भविष्यति। एवं ग्रहाः समुत्पन्ना बालान् गृह्णन्ति चाप्यतः । ग्रहोपसृष्टा बालास्तु दुश्चिकित्स्यतमा मताः । वैकल्यं मरणं चाशु ध्रुवं स्कन्दग्रहे मतम् । स्कन्द-